Roll No.
रोल नं.

| | | | | |
|---|---|---|---|---|
| | | | | |

**Code No. 002**

Candidates must write the Code on the title page of the answer-book.
परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।

# SANSKRIT (G)
# संस्कृत (ग)

***General Instructions :***

***सामान्य निर्देश :***

***Read the following instructions very carefully and strictly follow them :***

***निम्नलिखित निर्देशों को ध्यान से पढ़ें एवं पूर्णरूप से उनका अनुपालन करें।***

*Time allowed : 3 hours* — *Maximum marks : 80*

*निर्धारित: समय : होरात्रयम्* — अधिकतमाङ्का: *80*

**Note / नोट :**

(i) *Please check that this question paper contains* **08** *printed pages.*
*कृपया जाँच कर लें कि इस प्रश्न-पत्र में* **08** *मुद्रित पृष्ठ हैं।*

(ii) *Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.*
*प्रश्न-पत्र में दाहिने हाथ की ओर दिए-गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।*

(iii) *Please check that this question paper contains* **12** *questions.*
*कृपया जाँच कर लें कि इस प्रश्न-पत्र में* **12** *प्रश्न हैं।*

(iv) ***Please write down the Serial Number of the question in the answer-book before attempting it.***
***कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें।***

(v) **15** *minutes time has been allotted to read this question paper. The question paper will be distributed at* **10:15** *a.m. From* **10:15** *a.m. to* **10:30** *a.m., the students will read the question paper only and will not write any answer in the answer-book during this period.*
*इस प्रश्न-पत्र को पढ़ने के लिए* **15** *मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में* **10:15** *बजे किया जाएगा।पूर्वाह्न में* **10:15** *बजे से* **10:30** *बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका में कोई उत्तर नहीं लिखेंगे।*

(vi) *This question paper comprises* ***two*** *Sections - Section -* ***A*** *and Sections -* ***B****. All questions are compulsory.*
*प्रश्न-पत्र को* ***दो*** *खण्डों में विभाजित किया गया है – खण्ड –* ***'क'*** *एंव खण्ड –* ***'ख'***। *सभी प्रश्न अनिवार्य हैं।*

(vii) *In **section A** - total questions are **six** i.e. Q. No. **1** to Q. No. **6**.*
*Q. No. **1** carry **10** marks;*
*Q. No. **2** carry **05** marks;*
*Q. No. **3** carry **10** marks;*
*Q. No. **4** carry **05** marks;*
*Q. No. **5** carry **12** marks;*
*Q. No. **6** carry **08** marks;*
***खण्ड** – **'क'** में प्रश्न संख्या 1 से 6 तक **छः** प्रश्न हैं।*
*प्रश्न संख्या 1 के लिए 10 अङ्क हैं।*
*प्रश्न संख्या 2 के लिए 05 अङ्क हैं।*
*प्रश्न संख्या 3 के लिए 10 अङ्क हैं।*
*प्रश्न संख्या 4 के लिए 05 अङ्क हैं।*
*प्रश्न संख्या 5 के लिए 12 अङ्क हैं।*
*प्रश्न संख्या 6 के लिए 08 अङ्क निर्धारित हैं।*

(viii) *In **section B** - total questions are **six** i.e. Q. No. **7** to Q. No. **12**.*
*Q. No. **7, 8** and **9** carry **05** mark each;*
*Q. No. **10** carry **05** marks;*
*Q. No. **11** carry **04** marks;*
*Q. No. **12** carry **06** marks;*
***खण्ड** –**'ख'** में प्रश्न संख्या 7 से 12 तक **छः** प्रश्न हैं।*
*प्रश्न संख्या 7, 8 व 9 में प्रत्येक के लिए 05 अङ्क हैं।*
*प्रश्न संख्या 10 के लिए 05 अङ्क हैं।*
*प्रश्न संख्या 11 के लिए 04 अङ्क हैं।*
*प्रश्न संख्या 12 के लिए 06 अङ्क निर्धारित हैं।*

(ix) *There is no overall choice (except Q. No. **11)** in the question paper. However, an internal choice has been provided in some questions in each Section. Attempt the Question as per instruction.*
*समग्र प्रश्न-पत्र में (प्रश्न संख्या 11 को छोड़कर) कोई विकल्प नहीं है। तथापि कुछ प्रश्नों में आंतरिक विकल्प दिए गए हैं। प्रश्नों को दिशानिर्देश अनुसार करिऐ।*

(x) *In addition to this, separate instructions are given with each section and question, wherever necessary.*
*इसके अतिरिक्त, आवश्यकतानुसार, प्रत्येक खण्ड और प्रश्न के साथ यथोचित निर्देश दिए गए हैं।*

## खण्डः – क / SECTION - A

**1.** अधः प्रदत्तानां प्रश्नानां विकल्पेभ्यः समुचितम् उत्तराणि चित्वा लिखत – **1x10=10**

(i) 'अनुवनम्' इत्यत्र केन सूत्रेण समासः भवति ?

(क) द्वन्द्वे घि (ख) गवाश्वप्रभृतीनि च

(ग) अनुर्यत्समया (घ) अनुवादे चरणानाम् ।

(ii) 'सप्तगङ्गम्' इत्यत्र अव्ययीभावसमासः केन सूत्रेण भवति ?

(क) स्वयं क्तेन (ख) नदीभिश्च

(ग) अजाद्यन्तम् (घ) राजदन्तादिषु परम् ।

(iii) द्वितीयातत्पुरुषस्य उदाहरणम् अस्ति –

(क) कूपपतितः (ख) किरिकाणः

(ग) अजबलिः (घ) चौरभयम् ।

(iv) 'पापनापितः' इत्यत्र केन सूत्रेण समासो भवति ?

(क) किं क्षेपे (ख) पापाणके कुत्सितैः

(ग) कुत्सितानि कुत्सितैः (घ) सङ्ख्यापूर्वो द्विगुः।

(v) 'प्रशंसावचनैश्च' इत्यस्य सूत्रस्य उदाहरणम् अस्ति –

(क) ब्राह्मणशूरः (ख) ब्राह्मणदानम्

(ग) ब्राह्मणभयम् (घ) ब्राह्मणः।

(vi) 'उपहृतपशुः' इत्यस्य विग्रहं लिखत –

(क) उपहृतं पशुः येन (ख) उपहृतः पशुः यस्मात्

(ग) उपहृतः पशुः यस्मै सः (घ) पशवे उपहृतम् ।

(vii) उत्तरपदप्रधानः कः समासः भवति ?

(क) केवलसमासः (ख) तत्पुरुषः

(ग) अव्ययीभावः (घ) द्वन्द्वः ।

(viii) 'उष्ट्रखरम्' इति कस्य समासस्य उदाहरणम् ?

(क) चतुर्थीतत्पुरुषस्य (ख) नञ् तत्पुरुषस्य

(ग) द्विगुसमासस्य (घ) द्वन्द्वसमासस्य ।

(ix) 'अपथम् इदम्' इत्यत्र केन सूत्रेण नपुंसकलिङ्गं भवति ?

(क) द्वन्द्वे च (ख) स नपुंसकम्

(ग) अपथं नपुंसकम् (घ) अर्धर्चाः पुंसि च।

(x) 'द्विरात्रः' इत्यस्य विग्रहः कः ?

(क) द्वयोः रात्र्योः समाहारः (ख) द्वौ च रात्रौ च

(ग) द्वि रात्रम् (घ) द्वयः रात्र्यः ।

2. केवलं रेखाङ्कितानां पञ्चसूत्राणां यथानिर्देशम् उत्तरत – **1x5=5**

(i) तृतीया सप्तम्योर्बहुलम्। (वचनम्)

(ii) द्विगुरेकवचनम्। (पदच्छेदः)

(iii) अन्नेन व्यञ्जनम्। (विभक्तिः)

(iv) कर्तृकरणयोस्तृतीया। (समासः)

(v) तृतीयाप्रभृतीन्यन्यतरस्याम् । (पदच्छेदः)

(vi) कडाराः कर्मधारये। (विभक्तिः)

3. पञ्चसूत्राणाम् अर्थबोधनं कुरुत – **2x5=10**

(i) सह सुपा

(ii) प्राक् कडारात् समासः

(iii) अक्षशलाकासंख्याःपरिणा

(iv) भक्ष्येण मिश्रीकरणम्

(v) सप्तमी शौण्डैः

(vi) उपमानानि सामान्यवचनैः

(vii) श्रेण्यादयः कृतादिभिः।

4. पञ्चसूत्राणाम् उदाहरणानि लिखत– **1x5=5**

(i) लुटः प्रथमस्य डारौरसः।

(ii) अदिप्रभृतिभ्यः शपः।

(iii) तिककितवादिभ्यो द्वन्द्वे।

(iv) येषां च विरोधः शाश्वतिकः।

(v) द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्।

(vi) चार्थे द्वन्द्वः ।

(vii) क्तेन च पूजायाम्।

5. त्रीणि रूपाणि साधनीयानि। **3x4=12**

(i) पञ्चनदम् ।

(ii) वध्यात् ।

(iii) पूर्वाह्णः।

(iv) कुम्भकारः।

**6.** अतिलघूत्तरीया: प्रश्ना:। **1x8=8**

(i) 'उपकुम्भम्' इत्यत्र कुम्भपदस्य अथवा समीपार्थस्य अनयो: कस्य प्राधान्यम्?

(ii) 'उन्मत्तगङ्गम्' इति कस्य सूत्रस्य उदाहरणम्?

(iii) 'शिरोग्रीवम्' इत्यत्र नपुंसकलिङ्गं केन सूत्रेण भवति?

(iv) आर्धधातुके विषये ब्रूञ्-धातो: क: आदेश: भवति?

(v) 'आख्याता' इत्यत्र मूलधातु: क:?

(vi) 'ध्वाङ्क्ष:' इत्यस्य क: अर्थ:?

(vii) 'स्वस्ति प्रजाभ्य:' इति कस्या: विभक्ते: उदाहरणम् ?

(viii) 'अगात्' इति उदाहरणं कस्य सूत्रस्य?

## खण्ड: - ख/ SECTION - B

**7.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत - **5**

"भद्रे! नूनम् । सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्"? इति इन्द्रेण पृष्टा सुरभि: प्रत्यवोचत् - "बहून्यपत्यानि मे सन्तीति सत्यम्। तवाप्यहम् एतस्मिन् पुत्रे विशिष्य आत्मवेदनाम् अनुभवामि । यतो हि अयमन्येभ्यो दुर्बल:। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातु: अभ्यधिका कृपा सहजैव" इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत् । स च तामेव असान्त्वयत् - "गच्छ वत्से! सर्वं भद्रं जायेत।" अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्ष: समजायत। पश्यत: एव सर्वत्र जलोपप्लव: सञ्जात:। कृषक: हर्षातिरेकेण कर्षणाविमुख: सन् वृषभौ नीत्वा गृहमगात्।

(अ) एकपदेन उत्तरत - **½x2=1**

(i) सर्वेषु अपत्येषु तुल्यवत्सला का भवति?

(ii) पश्यत: एव सर्वत्र क: सञ्जात:?

(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नैकम्) **1x1=1**

(i) दुर्बले सुते कस्या: अभ्यधिका कृपा सहजैव भवति?

(ii) इन्द्र: सुरभिम् किं कथयित्वा असान्त्वयत्?

(इ) यथानिर्देशमुत्तरत - **1x3=3**

(i) 'पुत्रे' इत्यस्य पर्यायपदं किं प्रयुक्तम्?

(ii) बहूनि अपत्यानि मे सन्ति इति सत्यम् । अत्र वाक्ये विशेषणपदं किम्?

(iii) 'सबल:' इत्यस्य विपरीतार्थकं पदं किं प्रयुक्तम्?

8. अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत – **5**

व्यायामो हि सदा पथ्यो, बलिनां स्निग्धभोजिनाम्।
स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः ॥

**प्रश्नाः–**

(अ) एकपदेन उत्तरत– **½x2=1**

(i) पथ्यः कः अस्ति ?

(ii) कीदृशानां बलिनाम् व्यायामः पथ्यः भवति ?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नैकम्) **1x1=1**

(i) व्यायामः कदा पथ्यतमः स्मृतः ?

(ii) केषां कृते व्यायामः पथ्यः भवति ?

(इ) यथानिर्देशम् उत्तरत – **1x3=3**

(i) 'कथितः' इति पदस्य पर्यायपदम् किम् प्रयुक्तम् ?

(ii) 'बलिनाम्' इति पदस्य विशेषणपदं किम् प्रयुक्तम् ?

(iii) 'ग्रीष्मे' इति पदस्य कृते विलोमपदं किं प्रयुक्तम् ?

9. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् उत्तरत – **5**

रामः – अहो! उदात्तरम्यः समुदाचारः। किं नामधेयो भवतोर्गुरु : ?
लवः – ननु भगवान् वाल्मीकिः।
रामः – केन सम्बन्धेन ?
लवः – उपनयनोपदेशेन।
रामः – अहम् अत्रभवतोः जनकं नामतो वेदितुम् इच्छामि।
लवः – न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।
रामः – अहो माहात्म्यम्।
कुशः – जानाम्यहं तस्य नामधेयम्।
रामः – कथ्यताम्।
कुशः – निरनुक्रोशो नाम...।
रामः – वयस्य, अपूर्वं खलु नामधेयम्।
विदूषकः – (विचिन्त्य) एवं तावत् पृच्छामि निरनुक्रोश इति क एवं भणति ?
कुशः – अम्बा।
विदूषकः – किं कुपिता एवं भणति, उत प्रकृतिस्था ?
कुशः – यदि आवयोर्बालभाव–जनितं कञ्चिदविनयं पश्यति तदा एवम् अधिक्षिपति–निरनुक्रोशस्य पुत्रौ, मा चापलम् इति।

विदूषक: – एतयो: यदि पितु: निरनुक्रोश इति नामधेयम् एतयोर्जननी तेन अवमानिता निर्वासिता एतेन वचनेन दारकौ निर्भर्त्सयति।

**प्रश्ना:–**

(अ) एकपदेन उत्तरत – **½x2=1**

(i) लवकुशयो: गुरो: नाम किम्?

(ii) कुश: स्वजनकस्य किं नाम कथयति?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नैकम्) **1x1=1**

(i) केन सम्बन्धेन वाल्मीकि: कुशलवयो: गुरु: अस्ति ?

(ii) लव: स्वजनकस्य नाम कथं न जानाति?

(इ) यथानिर्देशम् उत्तरत – **1x3=3**

(i) 'इच्छामि' इति पदस्य कर्तृपदं किं प्रयुक्तम्?

(ii) 'भगवान्' इति पदस्य विशेष्यपदं अत्र किं प्रयुक्तम्?

(iii) 'बालकौ' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

**10.** अधोलिखितवाक्येषु रेखाङ्कितपदानि आश्रित्य प्रश्ननिर्माणं कुरुत – (केवलं पञ्चप्रश्ना:) **1x5=5**

(i) <u>उद्याने</u> पक्षिणां कलरवं चेत: प्रसादयति।

(ii) मार्गे गहनकानने सा एकं <u>व्याघ्रं</u> ददर्श।

(iii) अयम् अन्येभ्यो <u>दुर्बल:</u>।

(iv) <u>आलस्यं</u> हि मनुष्याणां महान् रिपु:।

(v) <u>राजा</u> तु रक्षक: भवति।

(vi) <u>न्यायाधीशेन</u> पुन: तौ घटनाया: विषये वक्तुम् आदिष्टौ।

(vii) <u>तृणानाम्</u> अग्निना सह विरोधो भवति।

**11.** अधोलिखितश्लोकस्य रिक्तस्थानेषु अन्वयपूर्तिं मञ्जूषा-प्रदत्त-शब्दानां सहायतया कुरुत – **1x4=4**

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।
अश्वश्चेद् धावने वीर:,भारस्य वहने खर:।।

अन्वय: –

विचित्रे __(i)__ खलु किञ्चित् __(ii)__ न अस्ति। अश्व: चेत् __(iii)__ वीर:, भारस्य वहने __(iv)__ अस्ति।

मञ्जूषा

| निरर्थकम्, संसारे, खर:, धावने |
|---|

**अथवा**

एक एव खगो मानी, वने वसति चातकः। **1x4=4**

पिपासितो वा म्रियते, याचते वा पुरन्दरम्।।

अन्वयः -

एकः एव मानी __(i)__ चातकः वने __(ii)__ । (सः) वा __(iii)__ म्रियते वा पुरन्दरं __(iv)__ ।

मञ्जूषा

| वसति, खगः, याचते, पिपासितः |
|---|

**12.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारम् अर्थं चिनुत। (केवलं प्रश्नषट्कम्) **1x6=6**

(अ) नवमालिका रसालं मिलिता रुचिरं सङ्गमनम्।

(i) वृक्षम् (ii) आम्रम् (iii) सरसम्

(आ) पिको वसन्तस्य गुणं न वायसः।

(i) कपोतः (ii) खगः (iii) काकः

(इ) अरे वानर! तूष्णीम् भव।

(i) प्रसन्नः (ii) शान्तः (iii) चिन्तितम्

(ई) कथं मिथः कलहं कुर्वन्ति।

(i) परस्परम् (ii) मिलित्वा (iii) सस्नेहम्

(उ) करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

(i) पृष्टवान् (ii) दत्तवान् (iii) अचिन्तयत्

(ऊ) विमूढधीः पक्वं फलं परित्यजति।

(i) बुद्धिमान् (ii) साहसी (iii) मूर्खः

(ए) आरोग्यं चापि परमं व्यायामाद् उपजायते।

(i) रुग्णता (ii) शैथिल्यम् (iii) नीरोगिता

(ऐ) आर्यस्य प्रसादेन अखण्डिता मे वणिज्या।

(i) व्यापारः (ii) स्वस्थपूर्णा (iii) सम्पन्नता

-oOo-